PSBB Learning Leadership Academy

Bangalore-2021

Class:- VIII  Sub:- Sanskrit ii  Lang

Topic:-पाठः-23 - कालिदासः


---------------------------------------------------------

त्रयोविंशः पाठः

# कालिदासः

(KALIDASA)

को नाम न जानाति कविकुलगुरुं कालिदासम्। एषः कविकुलशिरोमणिः कदा कुत्र वा अभवत् इति निश्चयेन कथयितुं न शक्यते। कालिदासस्य विषये एका किंवदन्ती वर्तते। एका विद्योत्तमा नाम राजकन्या आसीत्। सा प्रतिज्ञामकरोत् यत् सा तस्यैव भार्या भविष्यति यः तां शास्त्रार्थे पराजेष्यते। अनेके पण्डिताः तया सह शास्त्रार्थं कर्तुमागच्छन् परं तां विजेतुं नाशक्नुवन्। अस्मात् कारणात् ते पण्डिताः कपटेन तस्याः विवाहं एकेन मूर्खेण नरेण सह अकारयन्। यदा विद्योत्तमा तस्याः च पतिः एकस्मिन् भवने आस्ताम् तदा एकः उष्ट्रः उच्चैः शब्दमकरोत्। तं शब्दं श्रुत्वा सः मूर्खः ''उट्र उट्र'' इत्येव अकथयत्। उष्ट्रशब्दस्य स्थाने अशुद्धम् उट्रशब्दमाकर्ण्य विद्योत्तमा पत्युः मूर्खतां ज्ञातवती। तदा सा भृशं दुःखिता सती बुद्धिहीनं पतिं भवनाद् निष्कासितवती। सः मूर्खः ग्लानिम् अनुभूय पश्चात्तापमकरोत्। एतदनन्तरं सः महाकाल्याः उपासनामकरोत्। तस्याः उपासनायाः प्रभावात् सः पाण्डित्यं लब्धवान्। तदा सः स्वभार्यां द्रष्टुं स्वभवनमागच्छत् तां च अकथयत्— ''अनावृतकपाटं द्वारं देहि।'' विद्योत्तमा पृष्टवती ''अस्ति कश्चिद् वाग्विशेषः ?'' एतानि त्रीणि पदानि श्रुत्वा कालिदासः काव्यत्रयमरचयत्।



महाकविकालिदासेन रचितेषु ग्रन्थेषु ऋतुसंहारं नाम गीतिकाव्यं, रघुवंशं कुमारसम्भवं च द्वे महाकाव्ये, मेघदूतनामकमेकं खण्डकाव्यं, मालविकाग्निमित्रं, विक्रमोर्वशीयम् अभिज्ञानशाकुन्तलं च त्रीणि नाटकानि सन्ति। एतासु कृतिषु अभिज्ञानशाकुन्तलम् इति नाटकम् अस्य श्रेष्ठा रचना मन्यते। कालिदासस्य रचनासु उज्जयिनीवर्णनम् अतीव रमणीयं स्वाभाविकं च प्रतिभाति। अनेनेदं कथयितुं शक्यते यत् सः उज्जयिनीनगर्याम् अवसत् वीरविक्रमादित्यस्य च नवरत्नेषु अन्यतमः आसीत्।

"उपमा कालिदासस्य" इतीयम् उक्ति: कालिदासस्य विषये अतीव प्रसिद्धा वर्तते। कालिदासस्य रचनासु उपमानां सौन्दर्यं रसिकानां हृदयम् आह्लादितं करोति। एतदतिरिक्तं सर्वे शब्दा: स्थाने एव प्रयुक्ता: विद्यन्ते अर्थात् तस्य कृतिषु एकोऽपि शब्द: अनावश्यक: अनुचित: इति कथयितुं नैव शक्यते। रसस्य निष्पत्ति: अलंकाराणां च चमत्कार: तस्य कृतीनां काव्यसुषमां सम्यग्रूपेण प्रकटयत:। एतत् सर्वमालोच्य कालिदासविषये एतत् कथयितुं पार्यते यद् असौ भारतवर्षस्य "शेक्सपियर" अस्ति।

## शब्दार्था: (WORD-MEANINGS)

| | | | |
|---|---|---|---|
| किंवदन्ती | = | कथा | Tale |
| पराजय् (परा+जि) | = | हराना | To defeat |
| शास्त्रार्थम् | = | शास्त्रार्थ | Scholarly debate (objective case) |
| विजेतुम् | = | जीतने के लिए | To win |
| कपटेन | = | धोखे से | Deceitfully |
| कारय् (कृ+णिच्) | = | कराना | To make someone do |
| उष्ट्र: | = | ऊँट | Camel |
| ज्ञातवती | = | जान गई | Came to know |
| निष्कासितवती | = | निकाल दिया | Expelled |
| भृशम् | = | अत्यधिक | Very much |
| पश्चात्तापम् | = | पछतावा, अनुताप | Repentance (objective case) |
| अनावृतकपाटम् | = | (द्वार) जिसके किवाड़ खुले हों | (Gate) with open doors |
| वाग्विशेष: | = | वाणी की विशिष्टता | Excellence of speech |
| कृतिषु | = | रचनाओं में | In the works |
| आह्लादितम् | = | आनन्दित | Delighted |
| प्रति+भा | = | प्रतीत होना | To appear |
| निष्पत्ति: | = | सिद्धि, परिणति | Consummation |
| काव्यसुषमाम् | = | काव्य सौन्दर्य को | Poetic beauty (objective case) |
| रसिकानाम् | = | रसिकों का | Of those having aesthetic taste |
| प्रकटयत: | = | (दो) प्रकट करते हैं | (Two) exhibit, make known |
| पार्यते | = | जा सकता है | Can be |

## अभ्यासः (EXERCISE)

**1. निम्नलिखित प्रश्नों के उत्तर संस्कृत में दीजिए**

**(Answer the following questions in Sanskrit)**

(क) राजकन्या कीदृशीं प्रतिज्ञामकरोत्? ..................................................

(ख) पण्डिताः केन सह राजकन्यायाः विवाहम् अकारयन्? ..................................................

(ग) कालिदासः पाण्डित्यं कथं लब्धवान्? ..................................................

(घ) कालिदासः स्वभवनं गत्वा स्वभार्यां किम् अकथयत्? ..................................................

(ङ) विद्योत्तमा कालिदासं किं पृष्टवती? ..................................................

**2. रिक्त स्थान भरिए (Fill in the blanks)**

(क) विद्योत्तमा .................. भवनात् बहिरकरोत्।

(ख) पण्डिताः .................. शास्त्रार्थे विजेतुं नाशक्नुवन्।

(ग) कालिदासः .................. अवसत्।

(घ) कालिदासेन .................. नाम गीतिकाव्यं रचितम्।

(ङ) कालिदासः .................. अन्यतमः आसीत्।



**3. निम्नलिखित पदों में धातु तथा प्रत्यय बताइए**

**(Identify the root and suffix in the following words)**

| पद | धातु | प्रत्यय | पद | धातु | प्रत्यय |
|---|---|---|---|---|---|
| (क) कथयितुम् | .................. | .................. | (ख) विजेतुम् | .................. | .................. |
| (ग) श्रुत्वा | .................. | .................. | (घ) आकर्ण्य | .................. | .................. |
| (ङ) अनुभूय | .................. | .................. | (च) द्रष्टुम् | .................. | .................. |

**4. निम्नलिखित शब्दों के मूल शब्द, लिङ्ग, विभक्ति तथा वचन बताइए**

**(Identify the nominal stem, gender, case-ending and number of the following words)**

| शब्द | मूल शब्द | लिङ्ग | विभक्ति | वचन |
|---|---|---|---|---|
| (क) नाटकानि | नाटक | नपुंसकलिङ्ग | प्रथमा, द्वितीया | बहुवचन |
| (ख) नगर्याम् | ...................... | ...................... | ...................... | ...................... |
| (ग) पत्युः | ...................... | ...................... | ...................... | ...................... |

(घ) महाकाल्याः ...................... ...................... ...................... ......................

(ङ) त्रीणि ...................... ...................... ...................... ......................

5. **निम्नलिखित में सन्धि-विच्छेद कीजिए और सन्धि का नाम बताइए**

**(Disjoin and name Sandhis in the following)**

| शब्द | सन्धि-विच्छेद | सन्धि का नाम |
| --- | --- | --- |
| (क) तस्यैव = | ...................... + ...................... | .............................. |
| (ख) नाशक्नुवन् = | ...................... + ...................... | .............................. |
| (ग) इत्येव = | ...................... + ...................... | .............................. |
| (घ) अनेनेदम् = | ...................... + ...................... | .............................. |
| (ङ) एकोऽपि = | ...................... + ...................... | .............................. |

6. **सही उत्तर पर (√) चिह्न लगाइए (Tick the correct answer)**

(क) कस्य विषये एका किंवदन्ती वर्तते?

(*i*) मूर्खस्य ☐ (*ii*) पण्डितस्य ☐ (*iii*) विक्रमादित्यस्य ☐ (*iv*) कालिदासस्य ☐

(ख) के राजकन्यायाः विवाहं मूर्खेण सह अकारयन्?

(*i*) मन्त्रिणः ☐ (*ii*) जनाः ☐ (*iii*) पण्डिताः ☐ (*iv*) मूर्खाः ☐

(ग) कालिदासः कस्याः उपासनाम् अकरोत्?

(*i*) महाकाल्याः ☐ (*ii*) गुरुपत्न्याः ☐ (*iii*) कन्यायाः ☐ (*iv*) भार्यायाः ☐

(घ) कालिदासस्य रचनासु उपमानां सौन्दर्यं केषां हृदयम् आह्लादितं करोति?

(*i*) पण्डितानाम् ☐ (*ii*) राज्ञाम् ☐ (*iii*) स्त्रीणाम् ☐ (*iv*) रसिकानाम् ☐

**संक्षेप में इस पाठ में हमने ये बातें सीखीं :**

कालिदास का जीवन परिचय एवं उनकी रचनाएँ।

*नई धातुएँ*

कारय् (कृ + णिच्) प्रतिभा (प्रति + भा) पराजय् (परा + जि)

**रचनात्मक कार्य**

कारय् (कृ + णिच्) इस धातु का प्रयोग करते हुए पाँच वाक्य बनाइए।
यथा : अहं सुवर्णकङ्कणम् अकारयम्।